# Shri Turiyanandaprashastipranamanjalih

# श्रीतुरीयानन्दप्रशस्तिप्रणामाञ्जलिः

## Document Information

Text title : Shri Turiyanandaprashastipranamanjalih

File name : turIyAnandaprashastipraNAmAnjaliH.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Panchugopala Bandyopadhyaya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीतुरीयानन्दप्रशस्तिप्रणामाञ्जलिः

श्रोत्रियकुलमलङ्कुर्वाणो हि नैकष्यकुलीनात्मजः स्वयम् ।
बभूव किलान्वर्थनामासौ रामकृष्ण-पार्षद-हरिनाथः ॥ १॥

उत्तमः-श्लोकः श्रीहरिरेव रामकृष्ण-मूर्तिर्हि साम्प्रतम् ।
यदीयनाथत्वेनावश्यं सार्थकनामाभूत् स योगिराट् ॥ २॥

कलिकातायां लब्धजनुरसौ नैष्ठिकब्राह्मणाचाररतः ।
विद्या-विनय-सम्पन्नश्चैव शास्त्रव्यसनी वै तथानिशम् ॥ ३॥

“ब्रह्म सत्यं हि जगन्मिथ्ये’ति श्रुत्वा सर्ववेदान्तसारम् ।
श्रीरामकृष्ण-वक्तृ-निःसृतं प्राभून्नूनं ब्रह्मतत्त्ववित् ॥ ४॥

अत्याश्रमी स जग्राह नाम सदासङ्गं तु चरमार्थवाची ।
सच्चिदानन्दतत्त्वे तस्मिन् निमग्नो भृशं नु सुसमाहितः ॥ ५॥

सशल्याः कारिता विस्फोटाः सुतरां येन विकारशून्येन ।
चितिर्हि भिन्ना देहादिभ्यः सत्यं खल्विति दृढ प्रत्ययात् ॥ ६॥

आत्मा स्वतन्त्रः पृथग्भूतो देहादिसङ्घाताद् वै ध्रुवम् ।
इति स्फुटं प्रदर्शितं येन तं नमामि हि तुरीयानन्दम् ॥ ७॥

तुरीये पर आनन्दो यस्य तूपाधिवर्जिते चिदात्मके ।
तं तुरीयानन्दमाचार्यं “विवेक’-प्रियं भक्त्या नमामि ॥ ८॥

अद्वैतदृष्ट्या सहि “नेति” वादीत्यतो जगन्नैवतु वस्तुतः सत् ।
दृष्ट्यान्यया ब्रह्म तथा जगद्वै सत्यं न मिथ्येति सुभाषमाणः ॥ ९॥

आसीत् स खलु वेदान्तः प्रमूर्तो रक्तमांसयुक् ।
लीलावादमथाश्रित्य जीवसेवाव्रती महान् ॥ १०॥

विवेक-स्नेह-सन्नद्धो गत ऊर्व्यास्तु पश्चिमम् ।
दर्शितवान् स्वकं दिव्यं वैदान्तिकं हि जीवनम् ॥ ११॥

धन्य-धन्यः सुधन्योऽसौ यमिनां मूर्ध्नि संस्थितः ।
तं "तुरीयं" "सनाथं" वै प्रणमामि मुहुर्मुहुः ॥ १२॥

इति प्राध्यापकपाँचुगोपालबन्द्योपाध्याय विरचितः
"श्रीमत्तुरीयानन्दप्रशस्तिप्रणामाञ्जलिः" समाप्ता ।

Proofread by Aruna Narayanan

---

*Shri Turiyanandaprashastipranamanjalih*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*